N.A.

Vyadhikaran Kroda patrika

व्याधिकरण क्रोड पत्रिका

Sanskrit

Paper – Handwritten

N.A. (Very old)

11 Folio

14.5" X 4.7"

Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१०६० नं ६०

॥ अधिकरणक्रोडपत्रिका ॥ [illegible]

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशाय नमः। यत्समानाधिकरणात्यन्ताभावेत्यादि न चैवं तत्र यत्समभिव्याहारेण अभावत्वघटितधर्मितावच्छेदकीकृत्य यत्समानाधिकरणसाध्यव्यापकतावच्छेदकरूपाव-
च्छिन्नप्रतियोगिताकत्वयोरन्वयः। यत्समानाधिकरणतादृशप्रतियोगिताकत्वाभावत्वविशिष्टधर्मिणां धर्मितावच्छेदकीकृत्य यावत्त्वस्यान्वयः। यावत्त्वं च अनुयोगिताव-
च्छेदकत्वरूपं। तस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यस्य प्रथमान्तार्थे अन्वयः। अत्र च एवं तत्र यानुपादाने सर्वेषां यत्समानाधिकरणादीनां प्रथमा-
न्तार्थतया अभावत्वघटितधर्मितावच्छेदकीकृत्य प्रतियोगिताकावच्छिन्नसामानाधिकरण्यसाध्यव्यापकतावच्छेदप्रतियोगिताकत्वयोरन्वयः। तादृशप्रतियोगिता-
कत्वतादृशसामानाधिकरण्याभावत्वएतद्विशिष्टधर्मिणां धर्मितावच्छेदकीकृत्य यावत्त्वस्यान्वयः। यावत्त्वं च एतद्विशिष्टयद्धर्मव्यापकत्वरूपं। तस्य हेतुसमा-
नाधिकरणे प्रथमान्तार्थे अन्वयः। प्रमेयधूमवान् वह्नेरित्यादौ व्यभिचारिणि प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतादृशरूपावच्छिन्नप्रतियोगिताक त्यादि
त्वविशिष्टाभावत्वव्यापकत्वस्य हेतुसमानाधिकरणाभावे सत्त्वादव्याप्तिरिति यत्समानाधिकरणात्यन्ताभावेति एवं तत्रयं न चाच तस्य प्रथमान्तत्वाभावात् तन्तु-
स्य विशेष्यकरीत्यानुदये नातिव्याप्तिविरहात्। साध्यतानवच्छेदकसंबन्धेन साध्यव्यापकतासाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य साध्य-
तावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमितिकल्पान्तरे रूपावच्छिन्नत्वानुपादाने जलवृत्तित्वविशिष्टद्रव्यत्वाभावस्य लक्ष-
णाघटकत्वात् तमादाय वह्निमान् धूमादित्यादावव्याप्तिविरहाद् गुणवृत्तित्वविशिष्टसत्तान्वेति न च तथापि वह्निघटोभयाभावमादायाव्याप्तिरिति वाच्यं साध्य-
तावच्छेदकव्याप्यत्वस्य साध्यव्यापकतावच्छेदप्रतियोगितायां विवक्षितत्वात्। वह्निघटोभयाभावीयप्रतियोगितादिसाधारणतया साध्यतावच्छेदकव-
न्हित्वव्याप्यत्वविरहात्। न च तार्णतार्णोभयवन्ह्यभावीयप्रतियोगितायां साध्यतावच्छेदकवह्नित्वव्याप्यत्वसाध्यतावच्छेदकसंबन्धावच्छिन्नत्वयोः सत्त्वे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नन्वेतद्गुणप्रतियोगिताकाभावस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविरहाद् व्याप्तितादवस्थ्यमिति वाच्यं अभावसंज्ञावृत्तिधर्मानवच्छिन्नत्व
१ स्य प्रतियोगितायां विवक्षितत्वात्। केचित्तु द्रव्यत्वं द्रव्येतरासमवेतमात्रं। तथा च साध्यतावच्छेदकसंबंधादेरपि जलवृत्तित्वविशिष्टद्रव्यत्वाभावसाधा
रण्यातिवारणाय संभवात्। संयोगेन साध्यतायां अव्याप्तिमुक्त्वा समवायेन साध्यकस्थलेऽपि अव्याप्तिरित्याह जलवृत्तित्वविशिष्टेत्यादि। अनेकरूपावच्छिन्न
त्वानुपादाने तु संभवसंभवे व्याप्तेर्दानं संदर्भविरुद्धमिति चेन्न। साध्यतावच्छेदकसंबंधेन व्यापकतानेनैव संबंधेन प्रतियोगितावच्छेदकावच्छिन्नसामा
नाधिकरण्यस्य लक्षणे कान्ते घटवान् महाकालत्वात् इत्यादावभावमात्रस्यैव साध्यतावच्छेदककालिकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसा
मानाधिकरण्यसत्त्वेन लक्षणसमन्वसंभवात्। तन्मते ईश्वरेच्छाविषयत्वरूपस्य वाच्यत्वस्य विषयत्वे देवतानानात्वं घटवृत्तित्वविशिष्टवाच्यत्वाभावस्य
नाकच व्यापकतावच्छेदकप्रतियोगित्वविरहेण व्याधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसमन्वयसंभवात् नासंभव इति। न च घटवृत्तित्वविशिष्टग
गनाभावमादाय अव्याप्तिरिति वाच्यं व्यधिकरणतेरन्नाभावभेदात् घटवृत्तित्वविशिष्टगगनाभावाभावस्यापि लक्षणघटकत्वादिति तच्छे घटवृ
त्तित्वविशिष्टईश्वरेच्छा~~विषयत्व~~भावमादाय अव्याप्तितादवस्थ्यात् तस्य चेन्यात्। केचित्तु मतप्रयुक्तो व्याप्त्याभावविशिष्टाभावत्वावच्छिन्नप्रतियोगित्वं तस्यैवेति
मते घटवृत्तित्वविशिष्टवाच्यत्वाभावप्रतियोगित्वं घटवृत्तित्वविशिष्टे एवं वाच्यत्वघटेऽप्ययाभावप्रतियोगित्वं घटएवास्वीक्रियते यातादृशाभावस्य ल १
क्षणघटकत्वादितिवाच्यं तेमृत्वादित्यादौ लक्षणसमन्वसंभवात्। न च जलवृत्तित्वविशिष्टद्रव्यत्वाभावस्यापि प्रतियोगित्वं जलवृत्तित्वेऽस्वी
करणीयतया तादृशाभावमादाय वह्निमान्धूमात् सत्त्वात् जलेऽतिव्याप्त्यादावव्याप्तिदानसंदर्भविरुद्धमिति वाच्यं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पर्वतान्यत्वविशिष्टद्रव्यत्वाभावसाध्यकवह्निमद्धूमान् द्रव्यान्यत्वविशिष्टसत्ताभावसाध्यकसत्तावान् जातेरित्यादावव्याप्तिर्न हि तादृशाभावप्रतियो-
गित्वं पर्वतान्यत्वादेः स्वीकर्तुं शक्यत्वात्। जात्यादौ पर्वतान्यत्वविशिष्टद्रव्यत्वं नास्तीति प्रतीत्यनुपपत्तेः। जात्यादौ पर्वतान्यत्वादेः सत्त्वादित्याहुः। तदप्यसमत्
अत्रान्यतमत्वं अभावान्यतमत्वं एव तद्वृत्तियोगिताभावसाध्यकवाच्यं ज्ञेयत्वादित्यादावव्याप्तिनादृवस्थ्यात्। जलवृत्तित्वविशिष्टद्रव्यत्वाभावसाध्या
व्याप्तिवारणाय रूपावच्छिन्नेति जगदीशेनोक्तं तच्च प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणे ~~[illegible]~~ न्यूनवारकपर्याप्तिनिवेशाज्जलवृत्तित्व
विशिष्टद्रव्यत्वाभावस्य प्रतियोगितावच्छेदकीभूतद्रव्यत्वावच्छिन्नसामानाधिकरण्यस्य हेत्वधिकरणावच्छेदेन सत्त्वात् क्वचन व्याप्तिरिति चे-
न्न धूमवान् वह्नेरित्यादौ धूमाभावस्याव्याप्यवृत्तितया लक्षणाघटकत्वात् तदनुयोगिकान्यत्वाभावस्य प्रतियोगितावच्छेदकीभूतत्वेऽन्यत्वपर्याप्तिअवच्छिन्नसा-
मानाधिकरण्याद्यतिव्याप्तावपि न्यूनवारकपर्याप्तिनिवेशस्यावश्यकतया जलवृत्तित्वविशिष्टद्रव्यत्वाभावसाध्याव्याप्तिरतो रूपावच्छिन्न-
नेद ५ त्वस्यावश्यकत्वात् तन्नचानुयोगिकव्यक्तित्वावच्छिन्नाभावस्य वह्निनिष्ठप्रतियोगिताकत्वसंबंधेनानुयोगिकत्वावच्छेदकत्वावस्यापि यावदन्तर्गतस्य
प्रतियोगितावच्छेदकीभूतत्वत्वाद्यात्मकत्वावच्छिन्नसामानाधिकरण्यविरहात् न्यूनवारकपर्याप्तिनिवेशेऽपि नातिव्याप्तिरिति वाच्यं सामानाधिकरण्यसं- नेद
बन्धेन जलत्वविशिष्टाभावादिकसाध्याव्याप्तितादवस्थ्यात्। एवं नानाधर्मावच्छिन्नप्रतियोगित्वस्यैकत्वेऽनुयोगिकव्यक्तित्वावच्छिन्नाभाव- ५
स्यापि प्रतियोगितावच्छेदकीभूतभेदत्वावच्छिन्नसमानाधिकरण्याद्यतिव्याप्तेः न्यूनवारकपर्याप्तिनिवेशेऽप्यावश्यकत्वं तत्र चायमवदकाची

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्र प्रतियोगितावच्छेदकनिरूपकताकघटीकरणतावच्छेदकवृत्तित्वपर्यवसितार्थश्च वैशिष्ट्यं च स्वावच्छेदकतावच्छिन्नपर्याप्त्यनुयोगितावच्छेदक प
२ रूपवृत्तित्वसंबंधेन वृत्तिताच स्वावच्छेदकतावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसंबंधेन तच्च समभिव्याहृतनानाधर्मावच्छिन्नप्रतियोगिताका
ऐक्येन वह्न्यभावीयवह्नित्वधूमीयरूपवह्निनिष्ठप्रतियोगित्वेत्यादिसमभिव्याहृतनानाधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टनिरूपकत्व
स्याप्रसिद्ध्यावह्निमान्धूमादित्यादावव्याप्तिरिति वाच्यं। समभिव्याहृतत्वस्यावच्छेदकतावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेद
करूपवृत्तित्वेतत्संबंधेन निरूपकतायां प्रतियोगितावैशिष्ट्यं स्वावच्छिन्नत्वात्वन्न्यभावीयप्रतियोगितावच्छेदकतपर्याप्त्यनुयोगितावच्छेदक
रूपवृत्तित्वेपि स्वसमभिव्याहृतत्वस्य वह्नित्वावच्छिन्नानिरूपकतायां सत्वात् लक्षणसमन्वयादिति। न च समभिव्याहृतत्वविवेचने नैवसामंजस्ये तादृशरूप
वृत्तित्वविवेचनेन प्रयोजनाभावमिति वाच्यं वह्नित्वेन घटाभावीयप्रतियोगितावैशिष्ट्यस्य वह्नित्वावच्छिन्ननिरूपकतायां विरहात् वह्निमा
न्धूमात् द्रव्यत्वादावव्याप्त्यापत्तेः। एवं च जलवृत्तित्वविशिष्टद्रव्यत्वाभावीयप्रतियोगितावैशिष्ट्यस्य जलत्वद्रव्यत्वत्वावच्छिन्ननिरूपकतायां सत्वा
त् तस्माद्यायामातिवैरहेपि समाप्यत्वनिष्ठायां यत्संबंधेन जलवच्छिन्नानुपपत्तेः दायवह्निमान्धूमात् इत्यत्राव्याप्तिवारणाय रूपावच्छि
न्नत्वविशेषणस्य सार्थक्यसंभवात् इति हृदयं। तद्रूपावच्छिन्नत्वत्वदानेपि साध्यव्यापकतावच्छेदकरूपाप्रसिद्ध्या व्याप्तेः। नन्वा हि साध्यवन्नि
ष्ठाभावीयप्रतियोगितावच्छेदकत्वस्य धर्ममात्रे सत्वादिति चेन्न जवच्छेदकतावैशिष्ट्यप्रतियोगिताकसाध्यवन्निष्ठाभावविवक्षितत्वात् २
तद्वैशिष्ट्यं च स्वनिरूपितत्वस्वनिरूपितावच्छेदकतानिरूपितत्वोभयसंबंधेन तत्वाच्चवैशिष्ट्यं जन्याभावीयप्रतियोगितावच्छेदकतावैशि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ष्यविरहेऽपि कारणासंभवात् । न च तच्चापि साध्यवति जलवृत्तित्वविशिष्टद्रव्यत्वाभावस्य धारणासंभवात् । तत्प्रतियोगित्वेऽवच्छेदकतावैशिष्ट्यविरहा
दसंभवात् तत्प्रतियोगितानवच्छेदकरूपावच्छिन्नप्रतियोगिताकस्य जलवृत्तित्वविशिष्टद्रव्यत्वाभावस्य प्रतियोगितावच्छेदकावच्छिन्नसामाना
धिकरण्यविरहाद् द्रव्यत्वापत्तेरिति वाच्यं । साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावपदेन साध्यवन्निष्ठाभावप्रतियोगिताव
च्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावृत्तिप्रतियोगिताकाभावस्य विवक्षितत्वात् । न चाच्च तादृशवैशिष्ट्यादत्तावत्प्रति
योगित्वस्य तादृशरूपावृत्तित्वविरहात् तदभावेकरघमीवच्छिन्नाभावमादाय लक्षणसमन्वयसंभवात् । न च तथापि साध्यवति वह्नित्वेन घटाभावस्य
ता वाच्यत्वेन घटाभावस्य वर्तमानतया तत्प्रतियोगित्वावच्छिन्नप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदक
रूपावृत्तिप्रतियोगिताकत्वस्य वह्नित्वेन घटाभावासत्वाद् संभवापत्तेरिति वाच्यं साध्यवन्निष्ठाभावीयप्रतियोगितावैशिष्ट्यप्रतियोगिता
काभावनिवेशात् प्रतियोगितायाः साध्यवन्निष्ठाभावीयप्रतियोगितावैशिष्ट्यं च स्वविशिष्टरूपावृत्तित्वसंबंधेन रूपे स्ववैशिष्ट्यं च स्वा
वच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वस्य निरूपितअनुयोगितानिरूपितनिरूपकतावच्छेदकतात्वावच्छिन्न
प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वैतदुभयसंबंधेन प्रतियोगितायां रूपावृत्तित्वं च स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकप-
र्याप्त्यनुयोगितावच्छेदकत्वसंबंधेन न चाच वह्नित्वेन घटाभावस्य साध्यवन्निष्ठत्वेऽपि तादृशप्रतियोगिविशिष्टरूपाप्रसिद्ध्या नादृश
प्रतियोगितावैशिष्ट्यविरहेऽपि साध्यवन्निष्ठघटाभावीयप्रतियोगिताविशिष्टप्रतियोगिताकाभावः तत्प्रतियोगितानवच्छेदक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रूपावच्छिन्नप्रतियोगिताकयावदभावस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमिति निवेशात् वह्नित्वेन घटत्वाभावस्य प्रतियो-
२ गिताप्रतियोगितावच्छिन्नप्रतियोगिताकत्वविरहात् । सद्धूमवान्वह्नेः प्रतियोगितावच्छिन्नप्रतियोगिताकघटाभावप्रतियोगितानवच्छेदकत्वस्य
वह्नित्वादौ सत्त्वात् तद्रूपेणापि घटाद्यभावमादाय लक्षणसमन्वयः । प्रतियोगितायां प्रतियोगितावैशिष्ट्यं च स्वविशिष्टरूपवृत्तित्वसंबन्धेन रू-
पे स्ववैशिष्ट्यं च स्वावच्छेदकतावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वस्वाश्रयनिरूपितानुयोगितानिरूपितावच्छेदक-
तात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वैतदुभयसंबन्धेन रूपवृत्तित्वं च प्रतियोगितायां स्वावच्छेदकतात्वावच्छिन्नप्र-
तियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसंबन्धेनेत्यकौटकं द्रष्टव्यम् । अत्र च सन्निधानात्तन्नानावत्तया ब्रूमः सामान्यस्य चूडामणीयसंमतसंबन्धाव-
च्छिन्नप्रतियोगिताकद्रव्यसामान्याभावस्य जन्ययोगित्वकालत्वाभावस्य जन्यगोत्वकालत्वीयस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकत्वे
दृसामान्याभावस्य घटत्वेनेतद्भावस्य स्वप्रतियोगितावच्छेदकद्रव्यत्वेदत्वावच्छिन्नसामानाधिकरण्यप्रतीत्या स्वाभावद्रव्यत्वीयप्र-
तियोगितायां स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वमनाहृत्य जगदीशेनेदृशं च वह्नित्वेन धूमवद्वृत्तित्वाभावे रूपेण स्वन्यूनवृत्तिधर्मानवच्छि-
न्नत्वप्रतियोगित्वप्रसिद्ध्या वह्निमान् धूमात् इत्यादावव्याप्तिः साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताभावस्य
न्यूनवृत्तिधर्मानवच्छिन्नत्वं जगदीशानामभिप्रेतं । अत एव स्वन्यूनवृत्तिधर्मानवच्छिन्नप्रतियोगिताकयावदभावसमानाधिकरणप्रतियो-
गितावच्छेदकावच्छिन्नसामानाधिकरण्यमित्यनेनोक्तं यत्र स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वं तत्र जगदीशेन स्वनन्यपि साधु संग- २

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

छेतैः। स्वन्यूनवृत्तित्वं च स्वसमानाधिकरणत्वे सति स्वाश्रयवन्निष्ठभेदप्रतियोगितावच्छेदकत्वं। धूमी(संयोग)यसंयोगसंबंधावच्छिन्नप्रतियोगिताकद्रव्य
सामान्याभावीयप्रतियोगितासमानाधिकरण्यस्य तादृशप्रतियोगिता अवनीधरादौ धूमीयसंयोगसंयोगसंबंधावच्छिन्नद्रव्यत्वावच्छे
दकताकभेदस्य वर्तमानतया तादृशप्रतियोगितायां निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकत्वस्य च द्रव्यत्वादौ सत्वात्तदवच्छिन्नत्वस
तादृशप्रतियोगितायाविरहात् धूमत्वावच्छिन्नप्रतियोगितायामतिव्याप्तेर्वारणात्। एवं वह्नित्वावच्छिन्नधूमवद्वृत्तिनिष्ठप्रतियोगितायामपि
स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वविरहात् तमादाय वह्निमान् धूमादित्यादावव्याप्तिः। एवं च जलवृत्तित्वविशिष्टद्रव्यत्वाभावीयप्रतियोगितायां स्व
न्यूनवृत्तिजलवृत्तित्वविशिष्टस्यानवच्छिन्नत्वविरहात् कथं रूपावच्छिन्नत्वानुपादाने जलवृत्तित्वविशिष्टद्रव्यत्वाभावमादायाव्याप्त्यनुद्धा
वत्त्वं जगदीशेन कृतं वृत्तित्वं च स्वसमानाधिकरणत्वे सति स्वसमानाधिकरणभेदप्रतियोगित्वमेव स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वं नाव
तेन धूमीयसंयोगेन द्रव्यसामान्याभावीयप्रतियोगितायां स्वन्यूनवृत्तित्वे सति स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकधूमीयसंयो
गसंबंधावच्छिन्नत्वात्। स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकतायाश्च यावद्भावीयप्रतियोगितावच्छेदकताघटकसंबंधावच्छिन्नताग्रहवात्त्र
तेन स्वन्यूनवृत्तिधर्मानवच्छिन्नप्रतियोगिताकसामान्याभावाप्रसिद्ध्या धूमवान् वह्नेरित्यादौ धूमसामान्याभावीयधूमत्वावच्छिन्नप्रतियो
गितायां स्वसमानाधिकरणत्वे सति स्वसमानाधिकरणतां धूमानुयोगिसमवायेन धूमत्ववान्निवृत्तिभेदप्रतियोगितावच्छेदकत्वे। विनातिव्या।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्या त्तेः। न तु धूमसामान्याभावस्य तथापि लक्षणाघटकत्वात् धूमत्वे स्वसमानाधिकरणत्वमप्यास्ति एवं स्वसमानाधिकरणधूमत्वेन घटसत्वेन तद् प
४ वच्छेदकत्वं च धूमत्वे सत्वात् तस्य स्वन्यूनवृत्तित्वात् न तद्वह्निमत्त्वस्य तादृशप्रतियोगितायां विरहात्। व्यधिकरणधर्मावच्छिन्नाभावमादाय प्रतिव्या
प्तेरिति चेन्न। प्रतियोगितावैशिष्ट्य प्रतियोगिताकस्वसामानाधिकरण्यन्तेदस्य विवक्षणात् वैशिष्ट्यं च स्वविशिष्टरूपवृत्तित्वसंबंधेन स्वैस्व
वैशिष्ट्यं च स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्व स्वनिरूपितानुयोगितानिरूपितनिरूपकतावच्छेदकतात्वा
वच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वोभयसंबंधेन। तथा च धूमत्वेन घटो नेति नेदस्य प्रतियोगितावैशिष्ट्य प्रतियोगिताकत्वविरहात्।
धारणसंभवः। न च तथापि धूमघटौ नयत्वेदस्य प्रतियोगितावैशिष्ट्यप्रतियोगिताकत्वतया तदवच्छेदकत्वस्य धूमत्वे सत्वेन स्वन्यूनवृत्तितया तत्
द्वह्निमत्त्वस्य धूमाभावीयप्रतियोगितायां विरहात् लक्षणाघटकत्वात् उक्तावंतरमादायाव्याप्तितादवस्थ्यमिति वाच्यं स्वसमाना
धिकरणप्रतियोगितावैशिष्ट्यप्रतियोगिताकभेदप्रतियोगितावच्छेदकत्वव्याप्यत्वप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावृत्तित्वस्य
वप्रतियोगितायां स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वं। तथा सति धूमाभावीयधूमत्वावच्छिन्नप्रतियोगितायां उभयत्वेदप्रतियोगितावच्छेदकता
तत्वापत्तित्वेन स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वसत्वात् इति एवं सति जलवृत्तित्वविशिष्टद्रव्यत्वावच्छिन्नप्रतियोगितायां स्वन्यूनवृत्तिधर्मा
नवच्छिन्नत्वात् न माऽऽयाताव्याप्तिवारणाय रूपावच्छिन्नत्वस्यावश्यकत्वात्। वृत्तिवाच्छंसंयोगेन द्रव्यत्वविशिष्टधूमवदनुयोगिकसंयोग ४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वं धावच्छिन्नप्रतियोगिताकाभावस्य धूमाभावेऽसमानियतत्वात्तदीयप्रतियोगितायां स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वस्यात्वात् प्रतियोगितावच्छेदकतावच्छे
दकताघटकसंयोगसंबंधावच्छिन्नावच्छेदकत्वात्तद्धूमवदन्योन्यीकसंयोगवान्नेतिनेदप्रसिद्ध्या धूमवदन्योन्यीकसंयोगेतदीयप्रतियोगितासमाना
धिकरणत्वेदप्रतियोगितावच्छेदकत्वविरहेण स्वन्यूनवृत्तित्वविरहात् धूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेः न च प्रतियोगितावच्छेदकताघटकसं
बंधप्रतियोगितावच्छेदकताघटकसंबंधानियामकसंबंधान्यतरसंबंधेन स्वसमानाधिकरणत्वेदप्रतियोगितावच्छेदकताविवक्षणे तद्धूमवदन्यो
ता न्यीकसंयोगे स्वन्यूनवृत्तित्वसत्त्वात् प्रतियोगितावच्छेदकताघटकसंबंधानियामकसमवायसंबंधावच्छिन्नावच्छेदकत्वात्तद्धूमवदन्योन्यीकसंयोगवान्ने
नेदस्य ताद्रूप्यप्रतियोगिताश्रयघटपटादेर्वर्तमानत्वात्तत्प्रतियोगितावच्छेदकत्वस्य तादृशसंयोगे सत्त्वात् न तद्व्यच्छिन्नप्रतियोगिता स्वन्यूनवृत्तिध
र्मानवच्छिन्नेति वाच्यं धूमाभावस्य धूमवदन्योन्यीकसमवायेन द्रव्यत्वाभावस्य ऐक्येन तदीयप्रतियोगितायामेव तदन्योन्यकान्यत्वाभावस्य तत्
दन्योन्यकत्वेदवदन्योन्यीकस्वरूपेणावच्छेदकसामान्याभावस्य ऐक्यतयाऽतदन्योन्यकत्वेदानीं प्रतियोगितायां च स्वन्यूनवृत्तिधर्मानवच्छिन्नत्व
सत्त्वेन तत्प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यस्य तदन्योन्यकत्वेदानीं सत्त्वात् धूमवान्वह्नेरित्यादौ घटाभावे घटत्वात् इत्यादावतिव्याप्ति
तादृशप्रतियोगिताश्रये द्रव्यत्वे स्वरूपेण धूमवदन्योन्यीकसमवायस्य सत्त्वेन एवं वेदानीं प्रतियोगिताश्रयत्वेदसामान्यतदन्योन्यकत्वेदवद
न्योन्यीकस्वरूपस्य सत्त्वात् अतः स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वस्य स्वसमानाधिकरणे सति स्वधर्मवत्त्वनिवेदप्रतियोगितावच्छेदकतावच्छेदकत्वस्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म उपस्थाच्यतयाऽजलवृत्तित्वविशिष्टद्रव्यत्वाभाववत्त्वादायाम्यामिदाहासंभवात् तस्य स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वविरहेण जलवृत्त्यभावप्रतिकत्वान्नासंगति
५ द्रव्यत्वान्न च स्वाश्रयत्वानिष्ठभेदप्रतियोगितावच्छेदकतानवच्छेदकत्वरूपस्वन्यूनवृत्तित्वनिवेशेऽपि तत्प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिताश्रयपदि
करणत्वस्यानेदप्रतियोगितावच्छेदकतायाज्ञावस्यजात्यतया भूमीयसंयोगसंबंधावच्छिन्नप्रतियोगिताकद्रव्यसामान्याभावीयप्रतियोगितायान्यूनवृत्ति
त्वस्य द्रव्यत्वविरहात् प्रतियोगितावच्छेदकभूमीयसंयोगेन तादृशप्रतियोगिताश्रयपद्येकरणैः पर्वतादौ तादृशप्रतियोगितावच्छेदकसंबंधावच्छिन्नावच्छेदक
ताकद्रव्यत्वावच्छिन्नभेदस्याप्यव्यावर्तनेऽतिव्याप्तेः प्रतियोगितावच्छेदकसंबंधेन न्यूनवृत्तिकत्वनिवेशे स्वीयप्रतियोगितावच्छेदकसंबंधेन प्रतियोगिताश्रयपादिक
रणत्वस्यान्तरं तेन्यूनवारकं वारकं निवेश्यप्रतियोगितावच्छेदकसंबंधावच्छिन्नावच्छेदकप्रतियोगितावच्छेदकतानिवेशे तत्तद्वयसंयोगसंबंधेन तादृशप्र
तियोगिताश्रयपादिकरणे घटादौ निवेश्य संबंधावच्छिन्नावच्छेदकताकद्रव्यत्वावच्छिन्नभेदस्यावर्तमानतया तत्प्रतियोगितावच्छेदकत्वस्य द्रव्यत्वे सत्त्वेन न्यून
वृत्तित्वसत्त्वात् न च यावदभावीयप्रतियोगितावैशिष्ट्यस्यावच्छेदकसंबंधावच्छिन्नत्वस्यावच्छेदकधर्मावच्छिन्नत्वोभयसंबंधेन निरूपकतायां नवमते व्याव
स्यकतया तद्घटनिलंघटत्वात् द्रव्यत्वे तद्घटत्वे दाभावीयप्रतियोगितावैशिष्ट्यात् तु स्वरूपसंबंधावच्छिन्नत्वं तद्घटत्वे तत्त्वावच्छिन्नत्वाने रूपक
तामाप्तत्वद्घटत्वेदवदनुयोगिकस्वरूपसंबंधावच्छिन्नत्वे तत्त्वावच्छिन्नत्वानिरूपकतानिरूपितादिकरणकत्वस्यास्य विरहेऽपि हेतुत्वाधिकरणे तद्
घटे विरहात् ततः आव्याप्तिनिराकरणासंभवात् अत एव तादृशस्वन्यूनवृत्तिधर्मानवच्छिन्नत्वस्यानिष्प्रयोजनकतया पूर्वोक्तस्वन्यूनवृत्तिधर्मानवच्छि ५
न्नत्वस्य जलवृत्तित्वविशिष्टद्रव्यत्वाभावेऽसत्त्वान्नासंगतिः अन्यथा प्रतिप्रतियोगिताविशेषनिरूपकत्वविवक्षणे तद्घटत्वेऽपि तदनुयोगिकस्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रूपतद्व्यक्तिसंबंधेन तज्जेद्रसामान्याभावस्य तद्घटत्वेदसामान्याभावसमनीयतमस्य स्वन्यूनवृत्तिधर्मानवच्छिन्नजेदसामान्यानिष्टप्रतियोगिता
साध्यतामातिमालितादवच्छ्यातूतदृक्ष्यान्ते संबंधेनतादृप्रतियोगिताश्रयाधिकरणे ए तद्घटादौ तत्तदनुयोगिक स्वरूपतद्व्यक्तिसंबंधेन सा
मान्यतेदस्य वच्छसामानतया तद्व्यक्तिसंबंधावच्छिन्नावच्छेदकताकभेदानेतिभेदस्य वृत्तित्वेन स्वाश्रयानिष्टप्रतियोगितावच्छेदकतावच्छेद
करूपस्वन्यूनवृत्तित्वस्य भेदस्य विरहात् इति वाच्यं प्रतियोगिविशिष्टनिरूपकतावच्छेदके धूमवदनुयोगिकसंयोगेन द्रव्यसामान्या
भावसाध्यतायां व्याप्तिवारणसंभवात् न साध्यतात्वाभिरुद्धवरवच्छेदमाणजगदीशग्रंथासंगतिप्रसंगात् विशेषरूपेण संसर्गत्वा
नवच्छिन्नप्रतियोगेनैव तद्व्यक्तिसंबंधेनैव तदभावस्याधारणसंभवात् न दोषः। जलवृत्तित्वविशिष्टद्रव्यत्वाभावीयप्रतियोगिता स्वन्यूनवृ
त्तिधर्मानवच्छिन्नत्वाविरहेण व्याप्तिदानशंकादर्शनादि तथाचेन्न धूमाभावस्य प्रमेयत्वेन धूमाभावस्यैक्यतया तदीयप्रतियोगिता सा
ध्यतावच्छेदकपर्याप्तिवारणं प्रतादृशप्रतियोगिताकाभावेस्यावच्छेदकावच्छिन्नवत्त्वात् जगद्वृत्तित्वेन तत्तोभयाभावसाध्यव्यापकतावच्छेदकरू
पावच्छिन्नतादृशप्रतियोगिताकाभावस्य तादृशप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यवच्छेदमाणव्याप्यवृत्तित्वनिरूपकत्वस्यावश्य
कतया स्वन्यूनवृत्तिवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितायां निष्प्रयोजनकमिति चेन्न जलवृत्तित्वविशिष्टद्रव्यत्वाभावसाध्यकव्याप्तिनु
व व्याप्तेकृतं जगदीशेन उभयवावृत्तितानिरूपकत्वघटकस्यावच्छेदकावच्छिन्नाधिकरणत्वस्य प्रतियोगितावच्छेदकसंबंधेन वाच्यतया तु उत्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्य समवदनुयोगिकसंयोगि(क)संयोगसंबंधावच्छिन्नप्रतियोगिताकद्रव्यसामान्याभावे प्रतियोगितावच्छेदकत्वं समवदनुयोगिकसंयोगसंबंधेन स्वाव-
६ च्छेदकावच्छिन्नाधिकरणीभूतस्तादौ तादृशाभावविरहात् स्वावच्छेदकावच्छिन्नवद्वृत्तित्वविरहेणैव जपादावभावसत्त्वात् तादृशप्रतियोगितासाधारणा
तिव्याप्तेः द्रव्यत्वादौ चेन्न न्यूनवारकपर्याप्तिनिवेशे प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नाधिकरणता तथा च स्वद्वंसं
योगसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नाधिकरणे घटादौ स्वानिरूपकत्वाभावस्य सत्त्वेन भूमीयसंयोगसंबंधावच्छिन्नद्रव्यसामान्याभावीय
प्रतियोगितायाः जपादावाविरहेण जलघटकत्वस्याव्याप्तेरिति दिक् साध्यव्यापकतावच्छेदकप्रतियोगितकस्य घटत्वेन वह्न्य-
भावस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याविरहात् रूपावच्छिन्नेति सत्वीत्यादिना जगदीशेनोक्तं न्यूनयसाहेकायत्तु ग्रंथ-
स्यतु समवेतत्वता जातावतो जनैकृपमतान्नीप्रायकसत्त्वदत्वंतमसत्तद्गुणत्वाद्युक्तरग्रंथासंगतिः एवं मते तु यत्वीत्यादि ऐक्यं नोक्तं चेन्न समनीयता दे
जातावनात्मैक्यमतेनैव प्रतियोगितायां यावत्त्वानिवेशाभिप्रायकतया घटत्वेन वह्न्यभावसादृयाव्याप्या रूपावच्छिन्नत्वस्य वा वृत्तिदानं यत्तु ग्रंथ-
जीप्रायतः प्रतियोगितायां स्ववत्त्वस्य दूषितत्वात् जगावे यावत्त्वस्यानिवेशावश्यकतया हृमनीयत्वाभावानात्मैक्येन घटत्वेन वह्न्यभावप्र-
दधि ता. तियोगितावच्छेदकत्वावच्छिन्नसामानाधिकरण्यस्य सत्त्वात् तस्मात् दयाव्याप्त्यात् रूपावच्छिन्नत्वस्य व्यावृत्तिदानं प्रसक्तैरितीदि भावनीयं क्वचित् साध्य-
स्याव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकस्य यावदभावस्यानिरूपितप्रतियोगिताश्रयस्य सामानाधिकरण्यमित्यस्यैव सम्यक्त्वे ६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यस्यैवेति न च सव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकस्य स्वविशिष्टहेत्वधिकर
णावच्छेदेन घटात्मकप्रतियोगिसामानाधिकरण्यविरहान्न व्याप्तिरिति वाच्यं वह्निमत्त्वे न घटाभावस्य घटत्वेन वन्ह्यभावस्य चेत्क्वापि वन्हि
त्वेन घटाभावीयघटत्वावच्छिन्नवन्हिनिष्ठप्रतियोगिता, सामानाधिकरण्यस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन सत्त्वात् उक्तरूपसमन्वयसंभवा
दिति चेन्न धूमाभावस्य स्वनिरूपितप्रतियोगिताश्रयनिष्ठधर्मावच्छिन्नानिरूपकताकाधिकरणत्वस्य स्वविशिष्टहेत्वधिकरणे सत्त्वादिति
व्याप्त्यापत्तेः स्वनिरूपितप्रतियोगितावच्छिन्नानिरूपकताकाधिकरणतावद्वृत्तित्वस्य निवेशे स्वावच्छेदकतया विषयितासंबन्धेन वन्हेर्यत्र
साध्यतावन्हिविषयकज्ञानं यत्र हेतुः तत्र स्वविशिष्टहेत्वधिकरणे विषयतासंबन्धेन वन्ह्यभावीयप्रतियोगित्वात् तन्निरूपकताकाधिक
रणाधिकरणताविरहाद्व्याप्त्यापत्तेः न च समनियतताघटकाभावत्वादिघटितासंबन्धावच्छिन्नप्रतियोगिताकवन्ह्यभावस्य तादृशसंबन्धा
वच्छिन्नवन्हित्वावच्छिन्नानिरूपकताकाधिकरणसामान्यवृत्तित्वे तत्स्वरूपसंबन्धावच्छिन्नतदीयप्रतियोगित्वावच्छिन्नानिरूपकता
काधिकरणतावद्वृत्तित्वसत्त्वेन तत्र उक्तलक्षणसमन्वयसंभवात् इति वाच्यं तथा सति धूमाभावस्य स्वसमानियतवन्हिधूमोभयाभावीयप्रति
योगिताश्रयवन्हिसामानाधिकरण्येन धूमवान् वन्हेरित्यादावतिव्याप्त्यापत्तेः न च यावदंतर्गतायोगोलकाद्यन्यतमाभावस्य प्रतियो
गिताश्रयायोगोलकनिष्ठसामानाधिकरण्याविरहात् नातिव्याप्तिरिति वाच्यं तस्यापि अयोगोलकनिष्ठवाच्यत्वोभयाभावेन सह

॥व्या॥ मनीयत्वेन तदीयवाच्यत्वाभिरूप्रतियोगिताश्रयसामानाधिकरण्यसत्वात् न प्रतियोगितायाः स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वस्यावश्यकत्वेन
८ तदीयोक्तयत्वावच्छिन्नप्रतियोगितायां स्वावच्छेदकावच्छिन्नवृत्तित्वजगद्वृत्तिभिन्नत्वेन यत्नाव रूपव्याप्यवृत्तितानिरूपकत्वानिवेश
स्यावश्यकतया स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वानिवेशस्य प्रयोजनाविरहात् तदीयप्रतियोगितायां स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वविरहोपि उ
कव्याप्यवृत्तितानिरूपकत्वसत्वेन तदीयप्रतियोगिताश्रयदयगतिव्याप्तेर्दुर्वारत्वात्. एवं समनीयतानात्मानैक्यमते वह्नित्वेन
घटाद्यभावस्य स्वानिरूपितप्रतियोगिताश्रयघटसामानाधिकरण्याविरहात् उक्तसंबन्धावच्छिन्नेति. केचित्तु धूमवदनुयोगिकसंयोगसंबन्धावच्छि
न्नप्रतियोगिताकद्रव्यसामान्याभावी[illegible]स्य धूमाभावसमनीयततया तदीयप्रतियोगितासामानाधिकरण्याव्याप्या यावदभावीयप्रतियोगिता
यां स्वन्यूनवृत्तिधर्मानवच्छिन्नत्व वह्नित्वेन धूमवद्वृत्त्यभावस्य साध्यव्यापकतानवच्छेदकरूपावच्छिन्नप्रतियोगिताकस्य स्वानिरूपितस्वन्यू
नवृत्तिधर्मानवच्छिन्नप्रतियोगित्वाप्रसिद्ध्या अव्याप्तिः अभिमेन साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायां च स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वं प्रतिपादितं जग
दीशेनाज्ञत्रेयमाशङ्का स्वन्यूनवृत्तिभिन्नसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकयावदभावानां स्वानिरूपितस्वन्यूनवृत्तिधर्मानवच्छिन्नप्रतियोगिता
माऽवच्छेदकावच्छिन्नसामानाधिकरण्यं दृश्यते वं रीत्या निवेशेनैव सामञ्जस्ये स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वानिवेशनमग्रे च गुरुतरस्वन्यूनवृत्तिधर्मानवच्छिन्न
तावन्मात्रनिवेशनं चानतिप्रयोजनकं तथाहि प्रतियोगिताविशिष्टहेतुसमानाधिकरणाभावीयप्रतियोगितानुयोगितानिरूपकभावदत्तावान्नां स्वानिरूपित ॥८॥
प्रतियोगिताविशिष्टप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याभिमतपर्यवसितार्थहेतुसमानाधिकरणाभावीयप्रतियोगितायां प्रतियोगितावैशिष्ट्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वतादात्म्यस्वन्यूनवृत्तिधर्मभिन्नसाध्यतावच्छेदकरूपावच्छिन्नत्वोभयसंबंधेन द्वित्वीयेयावद्वृत्तीयप्रतियोगितायां प्रतियोगितावैशिष्ट्यं स्वतादात्म्यस्वन्यूनवृ
त्तिधर्मभिन्नधर्मावच्छिन्नत्वोभयसंबंधेन तेन च न यावद्वृत्तीयप्रतियोगितायां न नातिव्याप्तिः स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वस्य परिष्कारे धूमवान् वह्नेरित्यादावतिव्या
प्तितादवस्थ्यात्। धूमाभावस्य धूमीयसंयोगसंयोगसंयोगसंबंधावच्छिन्नप्रतियोगिताकद्रव्यसामान्याभावस्यैव सत्त्वात् तदीयप्रतियोगितायाः स्वन्यूनवृत्तिभि
न्नधूमीयसंयोगावच्छिन्नतदीयप्रतियोगितावैशिष्ट्यसत्त्वात् तत्प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यात् न च स्वप्रतियोगितावच्छेदकसंबंधेन न संबंधिता
संबंधावच्छिन्नस्वाश्रयानिष्ठभेदप्रतियोगितावच्छेदकताविशेषणात् धूमीयसंयोगस्य स्वन्यूनवृत्तित्वसत्त्वेन तद्भिन्नत्वविरहात् न तत्रातिव्याप्तिरिति वाच्यं तादात्म्यसति
धूमाभावस्य धूमवदनुयोगिकसमवायेन द्रव्यत्वाभावस्यैव सत्त्वात् तदीयप्रतियोगितायां स्वन्यूनवृत्तिभिन्नधूमवदनुयोगिकसमवायावच्छिन्नत्वेन प्रतियोगिता
विशिष्टतया तत्रातिव्याप्तितादवस्थ्यात् न च धूमाभावस्याव्याप्यवृत्तितया व्यापकत्वविरहात् उक्तसंयोगेन कालत्वाभावमादायातिव्याप्तेर्दुर्वारत्वादिति वाच्यं उक्तसं
योगानुयोगिकालत्वाभावस्य उक्तयोगानुयोगिकान्येदवदनुयोगिकस्वरूपसंबंधावच्छिन्नप्रतियोगिताकभेदसामान्याभावस्यैव सत्त्वात् तदीयप्रतियोगितायां स्वन्यूनवृत्तिभिन्ना
योगानुयोगिकान्येदवदनुयोगिकस्वरूपसंबंधावच्छिन्नत्वेन प्रतियोगिताविशिष्टतया तत्रादायातिव्याप्तितादवस्थ्यात् न च स्वन्यूनवृत्तिभिन्नधर्मानिष्ठावच्छेदकतायाः किंचित्
संबंधावच्छिन्नत्वं निवेश्यं नैवं तादृशप्रतियोगितावारणसंभवः संबंधानिष्ठावच्छेदकतायाः किंचित्संबंधावच्छिन्नत्वविरहादिति वाच्यं अनुयोगिकालत्वाभावसम
कोद.+ नीयतस्य अनुयोगितोऽवाच्यत्वात्मान्यतरत्वेन अनुयोगोत्तककवाच्यत्वेऽपि यत्नाभावस्य प्रतियोगितायां स्वन्यूनवृत्तिभिन्नतादृशान्यतरत्वावच्छिन्नत्वेन तदीय
प्रतियोगितावैशिष्ट्यसत्त्वात् तत्रातिव्याप्त्यापत्तेर्दुर्वारत्वात् एवं तद्भिन्नघटत्वात् इत्यादावतिव्याप्त्यापत्तेः तद्घटभेदाभावसमनियतस्य तद्घटत्वेन द

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५ वाच्यत्वान्तरत्वेन तदघटत्वे दवाच्यत्वेन यत्प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यसत्वात् ननु स्वन्यूनवृत्तिधर्मत्वावच्छिन्नत्वेनिवेशेपि
तादृशज्ञान्यतरत्वस्य स्वन्यूनवृत्तित्वानिवीरहात् तदीयप्रतियोगितायां स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वसत्वेन तत्रातिव्याप्तेस्तादवस्थ्यात् इति चेन्न स्वन्यूनवृत्तिध
र्मवदन्यत्वस्य स्वन्यूनवृत्तिधर्मानवच्छिन्नपदेन विवक्षणात् वैशिष्ट्यं च स्वावच्छिन्नत्वस्वावच्छिन्नानिरूपकतानिरूपितानुयोगितानिरूपितत्वान्यतरसंबंधे
न तत्वाच्च तादृशज्ञानीयप्रतियोगितायां स्वन्यूनवृत्तितादृशज्ञान्यत्वावच्छिन्नानिरूपकतानिरूपितानुयोगितानिरूपितत्वसंबंधेन स्वन्यूनवृत्तिधर्मवदन्यत्वावि
रहात् न चाकाशमपि स्वन्यूनवृत्तिधर्मत्वावच्छिन्नत्वैशिष्ट्यस्य प्रतियोगितायां निवेशः वैशिष्ट्यं च स्वावच्छिन्नानिरूपकतानिरूपितानुयोगितानिरूपि
तत्वसंबंधेन तादृशज्ञान्यतरत्वावच्छिन्नप्रतियोगितायां स्वन्यूनवृत्तित्रिलतादृशज्ञान्यतरत्वावच्छिन्नानिरूपकतानिरूपितानुयोगितानिरूपितत्वविर
हेण स्वन्यूनवृत्तिभिन्नवैशिष्ट्याविरहात् नातिव्याप्तिरिति वाच्यं धूमाभावस्य वह्नित्वेन धूमवद्वृत्तेरत्यन्ताभावस्य तादृशप्रतियोगितायां स्वन्यूनवृत्ति
तिभिन्नधर्मवद्वृत्तित्वावच्छिन्नानिरूपकतानिरूपिततत्वेन तदवच्छेदकीभूतवह्नित्वावच्छिन्नसामानाधिकरण्यात् धूमवान् वह्नेरित्यादौ ज्ञातिव्याप्ते
दुर्वारत्वात् स्वन्यूनवृत्तिधर्मवद्वृत्तेः च तादृशज्ञान्यतरसंबंधेन स्वन्यूनवृत्तिवह्नित्वरूपधर्मवत्वेन तदीयप्रतियोगितायां तदन्यत्वविरहात् ज्ञान्यतापि स्व
न्यूनवृत्तिभिन्नसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकयत्वदज्ञावनाशानिरूपितस्वन्यूनवृत्तिधर्मानवच्छिन्नप्रतियोगितावच्छेद
कावच्छिन्नसामानाधिकरण्यमित्युक्तावेव वह्निमान् धूमवद्वृत्त्यत्यन्ताभावीयप्रतियोगितायां स्वन्यूनवृत्तिधर्मवदन्यप्रतियोगितावच्छेदकावच्छि

सामानाधिकरण्यसंबंधेन लक्षणसमन्वयः । अपाकजत्वव्यापि वह्निघटान्यतरत्वेन वह्निभिन्नान्यत्वाभावस्य निरूपकरूपावच्छिन्नप्रतियोगिताकतया तदीयस्व
न्यूनवृत्तिधर्मवत्प्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिरिति वाच्यं तादृशान्यतरत्वेन वह्निवह्निभिन्नान्यत्वाभावस्य वह्न्यधिकरणवृत्तिघटएतदुभयाभावस्यैक्य
तया तदीयप्रतियोगितायां स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वसत्त्वात् लक्षणगमनसंभवात् रूपावच्छिन्नप्रतियोगितायां स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वजगदीश
कृतं सद्गुणविरुद्धद्रव्यत्वारसेवेति चेन्नाऽवह्नेर्यत्र विषमीतासंबंधेन साध्यतावच्छेदकविषयकज्ञानत्वं हि तु सत्र वह्नित्वेन द्रव्याभावस्य विषमतासंबंधावच्छिन्नप्र
तियोगिताकस्य यावदन्तर्गततया तदीयस्वन्यूनवृत्तिधर्मवदन्यप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिप्रसंगात् वस्तुतस्तु यावदन्तर्गतीयप्रतियोगितायां स्वन्यू
नवृत्तिधर्मानवच्छिन्नत्वाभिवेशेऽपि धूमवान् वह्नेरित्यादौ धूमाभावसमनीयतवह्नित्वेन धूमवदवृत्तिवह्नितद्घटएतदन्यतराभावीयप्रतियोगितामप्र
सिद्ध्याऽव्याप्तितादवस्थ्यात् स्वतादात्म्यस्वाधिकरणत्वोभयसंबंधेन प्रतियोगितावैशिष्ट्यं यावदन्तर्गतीयप्रतियोगितायामभावस्य तथा वह्निमान् धू
मादित्यादौ वह्नित्वेन धूमवदवृत्तिवह्नितद्व्यक्तिएतदन्यतराभावस्य साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया तदीयप्रतियोगि
त्वविशिष्टान्यप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिरिति येनैव रूपावच्छिन्नप्रतियोगितायां स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वाभिवेशात् ननु च प्रतियोगितान्य
विशिष्टान्यत्वमेव यदि साध्याने एकभेदप्रतियोगितावच्छेदकतावच्छेदकत्वे सति स्वसामानाधिकरण्यरूपमेव स्वन्यूनवृत्तिवृत्तित्वं त्वेऽनाव्यते तदा एतादृशोऽज्ञा
त्वस्यैव वारणात्तत्र यदि च स्वसमानाधिकरणत्वे सति स्वसामानाधिकरण्याभेदप्रतियोगितावच्छेदकत्वरूपं धूमवद्वृत्तियोगिकसमवायसंबंधावच्छिन्न
प्रतियोगिताकद्रव्यत्वाभावस्य यथाश्रुतस्वन्यूनवृत्तिधर्मानवच्छिन्नत्वसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया तदीयप्रति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१ योगितावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तितादवस्थ्यात् न च तत्रापि तत्त्वार्थं तत्रैव वाच्यत्वोनमानाभावदृश्यासव्याप्तिता
दवस्थ्यात् इति वाच्यं प्रतियोगितावच्छेदकस्याधिकरणत्वं [illegible] विशिष्टरूपवत्तासंबंधेन रूपवत्तस्यावच्छिन्नानिरूपकतानिरूपितानुयो
गितानिरूपितत्वोभयसंबंधेन तत्वाच तादृशान्यतमावच्छीयप्रतियोगितायां स्वन्यूनवृत्तित्वस्य तादृशान्यतरत्वे विरहेऽपि तादृशोभयत्वस्य स्वन्यू
नवृत्तित्वतादृशानन्तत्वानिरूपकतानिरूपितानुयोगितानिरूपितत्वसत्वेन प्रतियोगितावच्छिन्नान्यतरस्य तादृशप्रतियोगितायां विरहादितिचेन्ना
वनीयं। अनुयावदत्ताव स्वस्वप्रतियोगिवृत्तित्वमेवानिवेश्यतां किं स्वप्रतियोगितावच्छेदकपर्याप्त्यसमानाधिकरण्यनिवेशनेनेति चेन्न चेवं वह्निमान्
धूमादित्यादौ पर्वतान्यत्वाभावसत्त्वादव्याप्तिप्रसंगः तस्य पर्वतत्वस्य रूपत्वपर्याप्तवृत्तित्वेन रूपत्वपर्याप्तत्वभेदरूपस्य प्रतियोगिवृत्तित्वविरहा
त् इति वाच्यं तस्य तत्स्वभावत्वेन नत्वादेरहात् तन्न घटरूपद्वयसामान्याभावस्य कालिकेन हेतुसमानाधिकरणस्य यावद्वृत्तगतितत्त्वप्रतियोगि
वृत्तित्वविरहात् इति न च तत्घटीयरूपद्वयसामान्याभावस्य कालिकेन स्वप्रतियोगिवृत्तित्वसत्त्वात् अतिव्याप्तेरिति वाच्यं तत्तद्योगोक्तीयरूपद्वय
सामान्याभावस्यापि कालिकेन स्वप्रतियोगिवृत्तित्वधूमवान् वह्नेरित्यादावतिव्याप्त्या स्वरूपेण स्वप्रतियोगिवृत्तित्वावच्छेदकतयतत्राप्या
तेतादवस्थ्यात् इति चेन्न स्वरूपेण हेतुसमानाधिकरणस्य विवक्षणात् तत्तद्घटीयरूपद्वयसामान्याभावस्य स्वरूपेण हेतुसमानाधिकरण्याविरहा
दव्याप्तिवारणसंभवात् इति चेन्न घटाभाववान् नत्वाभाववान् इत्यादौ घटाभावभेदाभावस्याभावप्रतियोगिताकात्वाधिकरणत्वाभावो ध्वे १

करणस्वरूपइतिप्रतेघटाभावस्वरूपतयास्वरूपेणैवस्वप्रतियोगिवृत्तित्वादतिव्याप्त्यापत्तेरप्रसिद्धांतकल्पेपिगगनाभाववतिजलसमावत्वादतुइत्वा
दौगगनाभाववत्तेदाभावस्यप्रतियोगितावच्छेदकीभूतवाच्यत्वावच्छिन्नसामानाधिकरण्यध्दतिव्याप्त्याभावप्रतियोगितावच्छेदकाधिकरणत्वा
वेनाधिकरणस्वरूपेणैवतल्लक्षणं वाच्यंतथाचपूर्वोक्तातिव्याप्तिवारणसंभवादितितत्त्वंपञ्चात्तिव्याप्तिवारणसंभवायावदभावीयप्रतियोगि
तावच्छेदकसामानाधिकरण्यधर्मावच्छिन्नप्रतियोगितागगनाभाववत्तेदाभावीयत्वव्यधिकरणधर्मावच्छिन्नत्वेनयाभावनिवेशात्गगनाभाववृत्ति
त्वं न वत्त्वादित्यादौगगनाभाववत्तेदाभावीयवाच्यत्वावच्छिन्नघटादिप्रतियोगिसमानाधिकरणधर्मावच्छिन्नप्रतियोगिकसंयोगस
बंधावच्छिन्नप्रतियोगिताकवाच्यत्वाभावीयत्वव्यधिकरणधर्मावच्छिन्नत्वोभयोसत्वात्तत्राव्याप्तिरितिवाच्यं स्वावच्छेदकसंबंधाव
च्छिन्नवृत्तितावच्छेदकीभूतस्वसमानाधिकरणस्वावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावीयत्वव्यधिकरणधर्मावच्छिन्नत्वोभय
भावस्यभावदभावनिरूपितप्रतियोगितायांनिवेशात् न वाच्यं ज्ञोसत्वादित्यादौसंयोगसंबंधावच्छिन्नवाच्यत्वाभावीयप्रतियोगितायां
स्वावच्छेदकसंबंधावच्छिन्नवृत्तितावच्छेदकीभूतसमानाधिकरणधर्मावच्छिन्नत्वविरहेणवाच्यत्वत्वेनज्ञेयत्वत्वावच्छिन्नतदीयप्रतियोगितायांतादृशप्र
तियोगिताकाभावीयत्वघटितत्वोभयाभावसत्वात् लक्षणसमन्वयसंभवादितिनतथापिवाच्यत्वेनज्ञेयत्वाभावीयप्रतियोगितायांस्वावच्छे
दकसंबंधावच्छिन्नवृत्तितावच्छेदकीभूतस्वसमानाधिकरणस्वावच्छेदकधर्मावच्छिन्नप्रतियोगिताभावविवक्षणात् वाच्यं ज्ञेयत्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१० दित्यादौ स्वसमानाधिकरणस्यावच्छेदकधर्मावच्छिन्नगगनाभाववत्त्वेदानीं ह्रप्रतियोगितायां कुलावयाभ्यां वृत्तितावच्छेदकीभूतगगनाभाववत्त्वे
दाभाववत्त्वरूपानुयोगितानिरूपितत्वसाध्यतावच्छेदकावच्छिन्नत्वोभयसत्वेनोभयाभाववत्त्वविरहात् उभयाभाववद्घटानुयोगिकस्वरूपसंबंधा
प्रतियोगिताकवाच्यत्वाभावीयत्वव्यधिकरणधर्मावच्छिन्नत्वेनयाभाववत्त्ववाच्यत्वत्वेन ज्ञेयत्वाभावीयप्रतियोगितायां सत्वात् लक्षण
संबंधा गमनं तथात्वात्। अथवा साध्यतावच्छेदकावच्छिन्नाभावस्य यावत्त्वाभावनिरूपितप्रतियोगितायां विवक्षणात् साध्यतावच्छेदकसंबंधावच्छिन्नसा
वच्छिन्नसाध्यतावच्छेदकविशिष्टप्रतियोगिताकाभावीयत्वस्वकालीनव्यधिकरणधर्मावच्छिन्नत्वोभयसंबंधावच्छिन्नप्रतियोगिकप्रतियोगि
त्वे साध्यतावच्छेदकवैशिष्ट्यं च स्वावच्छिन्नत्व स्वावच्छिन्नानिरूपकतानिरूपितानुयोगितानिरूपितत्वोभयसंबंधावच्छिन्नप्रतियोगिताकत्व
वाच्यगगनाभाववान् ज्ञेयत्वादित्यादौ वाच्यत्वावच्छिन्नज्ञेयत्वविशिष्टप्रतियोगिताकाभावीयत्वोभयसंबंधेन साध्यतावच्छेदकसंबंधसत्वा
त् गगनाभाववत्त्वेदानीं ह्रप्रतियोगितायां स्वकालीनव्यधिकरणधर्मावच्छिन्नत्वविरहेणोभयसंबंधावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदक
संबंधाभावसत्वात् तस्यादायातिव्याप्तिवारणसंभवात् वाच्यं ज्ञेयत्वादित्यादौ स्वावच्छिन्नसाध्यतावच्छेदकविशिष्टप्रतियोगिताप्र
सिद्ध्या तद्घटितोभयसंबंधावच्छिन्नप्रतियोगिकसंबंधाभावस्यैकवृत्तावपि तयावाच्यत्वत्वेन ज्ञेयत्वाभावीयप्रतियोगितायां सत्वा
ल्लक्षण[illegible]गमनसंभवात् न कोपि दोषः। न च यावदभावत्वरूपानुयोगितायां प्रतियोगिवृत्तितावच्छेदकत्वाभिवेशो देय १०

टाभाववान्तित्वं ज्ञानत्वादित्यादौ घटाभाववद्भेदाभावस्य घटाभावस्वरूपतया प्रतियोगिवृत्तित्वेपि घटाभाववद्भेदाभावत्वरूपानुयोगितायां
प्रतियोगिवृत्तितावच्छेदकत्वविरहात्तत्राव्याप्तिरिति वाच्यं घटीयरूपद्वयं सामान्याभावाभावसाधारणमिति वारणाय हेतुसमानाधिकरण्यस्य सं
बंधवैशिष्ट्येनैवावच्छेद्यं वाच्यं तथा तस्य लक्षणान्तरत्वेन दूषकत्वात् उक्त एव पूर्वलक्षणे दोषे निवेशे पणताविशेषसंबंधेन हेतुसामाना
धिकरण्यघटितलक्षणस्य लक्षणान्तरत्वमुक्तं जगदीशेन अनुयोगितायामनुयोगिस्वरूपत्वेपि तत्र तु घटभेदाभावस्वरूपानुयोगिता
यां प्रतियोगिवृत्तितावच्छेदकत्वसत्त्वादतिव्याप्तितादवस्थ्याच्च न त्वेवं घटाभाववद्भेदाभावस्य साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रति
योगिताकत्वस्यविरहात् व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावमादाय प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यक
त्वेपि तत्रातिव्याप्तितादवस्थ्यात् इति चेन्न साध्यतावच्छेद यत्किंचिदधिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्या
प्तानुयोगितावच्छेदकरूपवृत्तिनिरूपकतानिरूपितानिरूप्यताव ~~च्छेदक~~ प्रतियोगितावच्छेदकत्वाभाववद्रूपावच्छिन्नप्रतियोगिका
भावा इत्यादिनिवेशात् घटाभाववद्भेदाभावे निरुक्तसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वसत्त्वादिति विभावनीयं अ
भाववत्तावस्य केवलान्वयित्वमेवेच्छन्तां किं प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्योपादाने तेनैव गगनाभाववान् ज्ञ
भाववत्त्वादित्यादौ गगनाभाववद्भेदाभावस्य गगनाभावस्वरूपतया तस्य केवलान्वयित्वसत्त्वादतिव्याप्त्यापत्तेरिति दिक् अत्र च स्वावच्छेदका

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५१
११ वाछिन्नचंदवृत्तित्वाभिन्नत्वेन स्थाकाशाभावत्वरूपव्याप्यवृत्तितानिरूपकत्वानिवेशेपि न्यूनवारकपदानिवेशस्य प्रयोजनविरहात्
जलवृत्तित्वविशिष्टद्रव्यत्वाभावस्य स्वावच्छेदकद्रव्यत्वत्वावच्छिन्नवदवृत्तित्वस्य जगद्वृत्तिभिन्नत्वेन पर्यवसानेन तमादाय व्याप्तिवि
रहादिति जगदीशग्रन्थसंगतिरिति चेन्न। धूमवान्वह्नेरित्यत्राप्ययोगोलकान्यत्वविशिष्टप्रतियोगिताकाभावे स्वावच्छेदकभेदत्वावच्छिन्नवृत्ति
त्वजगद्वृत्तिभिन्नत्वेन दुष्टत्वे सत्त्वेन तल्लक्षणघटकतात्पर्याधिकरणत्वमविच्छिन्नाभावमादायातिव्याप्त्या व्याप्यवृत्तितादृशघटकस्वावच्छेदकाव
च्छिन्नवद्वृत्तित्वेत्यत्र श्रीन्यूनवारकपदाभिनिवेशस्यावश्यकतया तेजलवृत्तित्वविशिष्टद्रव्यत्वाभावमादायातिव्याप्त्यापत्तिदूषणत्वेऽपि संगति निरूपक + त्व
नचावच्छिन्नप्रतियोगिताकाभावेनिरूपकव्याप्यवृत्तिमानिरूपकत्वसत्त्वान्तमादायैवातिव्याप्तिवारणसंभवादिति वाच्यं समनियतनाना
घटावच्छिन्नप्रतियोगिताप्रायेकप्येनतप्रतियोगिताबच्छेदकभेदत्वावच्छिन्नसामान्याधिकरण्यस्य तादृशाभावेपि सत्त्वेन व्याप्यवृत्तिता
निरूपकत्वविरहात् नचायोगोलकावृत्तित्वात् तादृशमादायातिव्याप्तिवारणसंभवादिति वाच्यं अयोगोलकनिरूपितवृत्तिताभा
वविशिष्टप्रमेयत्वस्य अयोगोलकनिरूपितवृत्तित्वाभावसमनियतत्वमायोगोलकनिरूपितवृत्तित्वाभाववच्छिन्नाभावे स्वावच्छेदकप्रय
त्वावच्छिन्नसामानाधिकरण्यसत्त्वेन तत्प्रतियोगि व्याप्यवृत्तितानिरूपकत्वविरहात् श्रीन्यूनवारकपदाभिनिवेशस्यावश्यकतया ११

CC-0. Jangamwadi Math Collection. Digitized by eGangotri